ISSN : 2455-717X

# व्युत्पत्ति
# VYUTPATTI

(A peer reviewed Half yearly Research Journal of Humanities & Social Science)

सम्पादक

**प्रो. शिवशङ्कर मिश्र**

सह सम्पादक

**विजय गुप्ता**

Year : 2022 Vol. 01 Month : June

Published by : **Matrisadanam**, M.I.G - 2, A.D.A Colony, Naini, Prayagraj (U.P.)

## अनुक्रम.....


| क्र. सं. विषय | लेखक | पृष्ठ संख्या |
|---|---|---|
| 1. सूर्यरश्मेः प्रभावः चिकित्सा च | डॉ.हरीशकुमारः | 1 |
| 2. रामायणे विश्वबन्धुत्वम् | योगेशकुमारमिश्रः | 5 |
| 3. यादवाभ्युदयमहाकाव्ये समागतानां सन्नन्त..... | मधुरकवि-आचार्यः | 11 |
| 4. पाणिनीयप्रयुक्तानां भाववाचकपदानां..... | रविशङ्करद्विवेदी | 17 |
| 5. भारतीयदर्शनेषु जैनज्योतिषाधारितलोकविमर्शः | आकाशः | 28 |
| 6. काश्मीरशैवदर्शने शिवाद्वयवादः | अभिषेककुमारोपाध्यायः | 34 |
| 7. इको यणचीति सूत्रार्थविचारः | सुधीरप्रसादनौटियालः | 40 |
| 8. न्यायजैनदर्शनयोः कारणविवेचनम् | अभिषेककुमारशुक्लः | 44 |
| 9. तिथिगण्डान्तपरिज्ञानम् | राकेशममगाईं | 53 |
| 10. अष्टाध्यायी-सरस्वतीकण्ठाभरणदिशा समास... | प्रभाकरसुयालः | 59 |
| 11. निर्मल वर्मा के निबन्धों में संस्कृति-चिन्तन | प्रदीप चतुर्वेदी | 66 |
| 12. संयोगितास्वयंवर नाटक में समाज एवं ..... | अनु कुमारी | 71 |
| 13. अभिज्ञानशाकुन्तल में वर्णित प्रकृति..... | रमन शर्मा | 79 |
| 14. Yoga as a Relaxation Technique.... | Dr. Ramesh Kumar and Dr. Vikram Singh | 83 |

ISSN : 2455-717X

**व्युत्पत्ति**
वर्ष : 7, अङ्क (01) जून 2022

# इको यणचीति सूत्रार्थविचारः

**सुधीरप्रसादनौटियालः ***

**सारांशः**

व्याकरणशास्त्रस्य आधारभूतो ग्रन्थोऽस्ति 'अष्टाध्यायी' इति। तत्र संज्ञापरिभाषादीनि बहुविधानि सूत्राणि सन्ति। एषु विधिसूत्रम् 'इको यणचीति' अष्टाध्यायाः षष्ठाध्याये वर्तते। अत्र सूत्रे व्याख्यायां प्राङ्ग्व्यमतभेदेन महान्तः विचाराः समुपलभ्यन्ते। प्रकृतनिबन्धे सूत्रस्यास्य परिचयं प्रस्तूय सामान्यमर्थञ्च विधाय टीकाकाराणां न्यासपदमञ्जरीकारादीनां मतानि प्रतिपादयिष्यन्ते।

**सूत्रपरिचयः**

अथ व्याकरणशास्त्रे सूत्राणां प्राधान्यात् किं नाम सूत्रमिति जिज्ञासायां आल्पाक्षरा सन्दिग्धसारवद्विश्वतोमुखोस्तोभमनवद्यम् इति उक्तं विष्णुधर्मोत्तरे[1] पुराणे। सूत्राणि षड्विधानि समाम्नातानि तथा चोक्तम्-

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥** इति॥

अपूर्वविधायकत्वात् विधित्वमस्य सूत्रस्य।सूत्रमिदं षष्ठाध्यायस्य प्रथमपादस्य विद्यते। **"इको यणचि"**[2] योगेऽस्मिन् इकः इति षष्ठ्यन्तं पदमुद्देश्यबोधकम् यणिति विधेयतासमर्पकं प्रथमान्तं पदम् अचीति निमित्तबोधकं सप्तम्यन्तं पदमाहत्य त्रीणि पदानि सूत्रे विद्यन्ते। **"षष्ठी स्थानेयोगा"**[3] इति परिभाषया स्थाने इति लभ्यते **"संहितायाम्"**[4] इत्यस्य चाधिकारो

---

* शोधच्छात्रः, व्याकरणविभागः, संस्कृतविद्याधर्मविज्ञानसंङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी

1 विष्णुधर्मोत्तरे, तृ.ख.प्र. अध्याये

2 अष्टाध्यायी ६/१/७७

3 अष्टाध्यायी १/१/४९

4 अष्टाध्यायी ६/१/७२

विद्यते। संहितात्वं नाम अर्धमात्राधिककालव्यवधानशून्यत्वं तेन प्रातस्सायमुच्चरितयोः शब्दयोः सन्धिर्न भवति तत्र संहितात्वाभावात्। संहितायाम् इति सूत्रभाष्ये तु अचीत्यत्र औपश्लेषिकाधिकरणत्वमङ्गीकृत्य संहिताधिकारं प्रत्याचख्यौ भाष्यकारः। तथा च तत्रत्यं भाष्यम्– 'अयं योगः शक्योऽवक्तुं कथम्। अधिकरणं नाम त्रिप्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य तु शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्त्यन्यदत उपश्लेषात्। इको यणचि अच्युपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यतीति॥[1]

एतत्सर्वं निभाल्य दीक्षितः प्राह कौमुद्याम्-

**"इकः स्थाने यण् स्यादचि संहितायां विषये"**[2] इति काशिकारस्तु **"अचि परतः इको यणादेशो भवति**[3] इत्याह।

**न्यासपदमञ्जरीकारमतम् –**

काशिकाग्रन्थस्य न्यासपदमञ्जरीटीके नितान्तं प्रसिद्धे स्तः। तद्दिशा विचारः कश्चन समुपस्थाप्यते। द्वाभ्यामप्यत्र टीकाकृद्भ्याम् इको यणश्च साम्यात् भवतीति प्रतिपादितम्। इदमेवावलोक्य भट्टोजिदीक्षितः प्रौढमनोरमायां प्राह – "प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा, दीर्घाज्जसि चेतिज्ञापकात् ल्वादिभ्य इति निर्देशाच्च। तेनेक्शब्देन षड्वष्टिर्गृह्यन्ते यण्शब्देन सप्त। भाव्यमानत्वेन सवर्णाग्राहकत्वेऽपि गुणानामभेदकत्वेनानुनासिकानामपि यवलानां ग्रहणात् अतो नास्ति यथासंख्यम्"[4] इति अग्रे च लक्ष्यार्थबोधात् प्राक् शक्यार्थमादायापि यथासंख्यं नैव भवितुमर्हतीति प्रतिपादितम् ऋकारलृकारयोः प्रत्येकं त्रिंशतः उपस्थित्या यथासंख्याभावादिति।

प्राचीनैः जातिपक्षमाश्रित्य सामान्यतो विचार्य च तथोक्तमिति मम भाति। इकः ग्रहणाभावे व्यञ्जनस्यापि यण् प्राप्नोतीति सूत्रे इक्ग्रहणमिति प्रतिपादितम्। न्यासपदमञ्जरीकृद्भ्यां यथासंख्यत्वं यदभिहितं तत् जातिपक्षमाश्रित्येति नैव कश्चन दोषः। यदि प्रत्याहारेषु व्यक्तिपक्षः स्वीकृतः स्यात्तर्हि अवात्तामित्यादि न सिध्ययेत् झल्पदेन सकलझल्व्यक्तीनामसङ्ग्रहात्। उक्तं च भट्टनागेशेन –

"परे तु व्यक्तिपक्षे झलादिप्रत्याहारसूत्रेषु सर्वझकारादीनां ग्रहणं दुरुपपादम्। न हि तत्र लक्षणा वक्तुं शक्या लक्ष्यतावच्छेदकाग्रहात्। एवं च तत्र प्रत्याहारसूत्रेषु जातिनिर्देशेनैव निर्वाहः उचितः।

1 संहितासूत्रभाष्ये- पृष्ठ सं -७४
2 कौमुद्यां इकोयणचिसूत्रवृतौ
3 प्रकृतसूत्रे काशिका पृष्ट संख्या -२६७
4 इकोयणचिसूत्रेप्रौढमनोरमा पृष्ठ संख्या- १२४-१३२

एवं निष्कर्षतः इदं वक्तुं शक्यते जातिपक्षे **"यथासंख्यमनुदेशः समानाम्"**[1] इत्यनेनापि निर्वाहः व्यक्तिपक्षे तु **"स्थानेऽन्तरतमः"**[2] इति सूत्रेणैव निर्वाह इति बोध्यम्।

अत्रेयं शङ्का जागर्ति यत् व्याकरणसिद्धान्ते शब्दानां नित्यत्वं प्रतिपादितम् नित्यं हि नाम अविकार्योपजनानुपत्त्यव्यययोगि यत् तत् भवति एकस्य वर्णस्य स्थाने वर्णान्तरादेशविधानेन नित्यत्वं व्याहन्येत तथापि व्याकरणस्येदमत्र तात्पर्यं बोध्यम् यथा इको यणचि इत्यस्य यण्रहितबुद्धिप्रसङ्गे यण्सहितबुद्धिः बुद्धिः कार्या। अर्थात् यण्घटितः प्रयोगः साधुः स च प्रयोक्तव्यः इति विधित्वमप्यस्य सङ्गच्छते। एतदालोच्यैव नागेशः प्राह-

"व्याकरणस्य साध्वनुशासनत्वन्तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या मृजिप्रसङ्गे मार्जिः साधुर्भवतीत्यादिवृद्धिसंज्ञासूत्रस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत्साध्वित्यर्थापत्तिकल्प्यवाक्येन बोद्धयम्"[3] इति।

एतेन सर्वस्यापि व्याकरणस्य प्रामाण्यं रक्षितं भवति। एवं निष्कर्षतः विचार्यमाणे समेषामपि कैय्यटाद्याचार्याणां तात्पर्यम् अत्रैवेति पर्यवस्यति।

अत्रेदं बोध्यम् "इको यणचि" इत्यत्र इकः इत्यत्र या षष्ठी सा "षष्ठी शेषे" इत्यनेन बोध्या तदर्थश्च सम्बन्धः। संसर्गे च किंचिद्विशेषणं किंचिद्विशेष्यं भवति। प्रकृतसूत्रे इक्पदार्थः प्रकारः विशेष्यवाचकं पदमत्र नावलोक्यते अन्तरेण विशेष्यज्ञानं कोऽत्र सम्बन्धः इति ज्ञातुं नैव शक्यम्। यथा केवलं राज्ञः इति कथनेन कस्यचन सम्बन्धस्य ज्ञानं न भवति जन्यजनकभावो वा अवयवार्थभावो वा स्वस्वामिभावो वेति।

पुरुषः, पुत्र इत्यादि विशेष्यपदोपादाने सति सम्बन्धविशेषज्ञानं समुपजायते। प्रकृते कस्तावत् सम्बन्धः इति जिज्ञास्यते यदि सामीप्यं विशेष्यः इत्युच्यते तर्हि अवधित्वं सम्बन्धः अर्थश्च इकः समीपे यण् भवति इति जायते। अवयवस्य च यदा विशेष्यत्वमभ्युपेयते तथा सति षष्ठ्यर्थो निरूपितत्वं बोध्यम्। तथा सति वाक्यार्थो जायते इक्निरूपितावयवत्ववान् यण् इति। यदि च स्थानपदार्थः विशेष्यं तर्हि षष्ठयर्थः विषयविषयिभावोऽवसेयः। तस्मिँश्च पक्षे इकः स्थाने यण् भवतीत्यर्थो जायते। एषु पक्षेषु किं युक्तमत्रेति जिज्ञासायां "षष्ठी स्थानेयोगा"[4] इति परिभाषावतरति तथा सति स्थानपदार्थ एव विशेष्यो नान्यः कश्चनेति लभयते।

1 प्रकृतसूत्रे शब्दरत्नटीका पृष्ठ संख्या – १२४-१३२

2 अष्टाध्यायी १।३।१०

3 इकोयणचीतिसूत्रे लघुशब्देन्दुशेखरे पृष्ठ संख्या -६७

4 अष्टाध्यायी १/१/४९

उक्तं च भाष्यकृता "एकशतं षष्ठ्यर्थाः यावन्तो वा सन्ति ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति। इष्यते च व्याकरणे या षष्ठी सा स्थानेयोगेति"।

अचीत्यत्र या सप्तमी सा कीदृशीति विचार्यते। अत्र वटे गावः इत्यत्रेव औपश्लेषिकाधिकरणार्थबोधिका सप्तमी। यद्यपि वर्णानामाधारत्वं व्याहतं तथापि बौद्धं सामीप्याधारत्वं स्वीकृत्य समन्वयो विधेयः। बौद्धपदार्थस्य सयुक्तिकमुपस्थापनं भट्टनागेशेन मञ्जूषायां व्यधायि।

**एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः [1]॥**

इत्यादौ वन्ध्यासुतादिशब्दानां बौद्ध एवार्थः अङ्गीकार्यः। अन्यथा वन्ध्यासुतादिशब्दानां बाह्यार्थाभावेन अनर्थकत्वात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[2] इति प्रातिपदिकसंज्ञा न स्यात्। अतः प्रकृते औपश्लेषिकार्थस्वीकारे न काचिदापत्तिरिति शम्।

**सन्दर्भ ग्रन्थसूची :-**


१. अष्टाध्यायी भाग (१-२)- व्याख्याकार – प० ईश्वरचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली-२०१७
२. वैयाकरणसिद्धान्तकौमुदी- बालमनोरमा-तत्त्वबोधिनीसहिता, गिरिधरशर्मा चतुर्वेदः,मोतीलाल बनारसीदास, दिल्ली-२०१४
३. व्याकरणमहाभाष्यम् - श्री भार्गवशास्त्री जोशी, चौखम्भा संस्कृत प्रतिष्ठान, वाराणसी -२०१४
४. लघुशब्देन्दुशेखरः – पं. गोपाल शास्त्री नेने, चौखम्भा प्रकाशन, वाराणसी- २००७
५. परमलघुमञ्जूषा-व्याख्याकारः पं. वंशीधरमिश्रः, चौखम्बा विद्याभवन, वाराणसी
६. काशिका(द्वितीयभागः) – व्याख्याकार- डॉ. रघुवीर वेदालङ्कारः, चौखम्भा ओरियन्टालिया, दिल्ली- २०१०
७. प्रौढमनोरमा -पं. गोपाल शास्त्री नेने, चौखम्भा प्रकाशन, वाराणसी- २००७


* * *

1 शक्तिप्रकरणम्, परमलघुमञ्जुषा पृष्ठ संख्या -१८

2 अष्टाध्यायी १।२।४५।